मेकार्थीभावात्। एकार्थीभावश्च विशेष्यविशेषणभावाव-गाह्येकोपस्थितिजनकत्वम्। तथा च राजपुरुषादिश-ब्देन विशिष्टैकार्थबोधकतया न तदेकदेशे ऋद्धादेरन्वयः पुरुषांशे विशेषणतयोपस्थितस्य नाम्नादिसम्बन्धिता रा-जादीनाम् जनितान्वयाच्च निराकाङ्क्षतया न देवदत्तादेः स्वामितया पुरुषादावन्वय इति द्रष्टव्यम्। देवदत्तस्य गु-रुकुलमित्यादौ देवदत्तादेस्तु प्रधानीभूतकुलादिनैवान्वयः सम्बन्धस्तूपस्थितगुरुद्वारक एव षष्ठ्यर्थः यथोक्तं हरिणा "समुदायेन सम्बन्धो येषां गुरुकुलादिना। संस्पृश्याव-यवांस्ते तु युज्यन्ते तद्वता सह" इति। यद्वा सम्बन्धि-शब्दार्थस्य पदार्थैकदेशत्वेऽपि भवत्येव केषाञ्चित् सम्ब-न्ध्यन्वयः तदुक्तं तेनैव "सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते। वाक्यवत् सा व्यपेक्षापि वृत्तावपि न हीयते"। अतएव वार्त्तिककृता "सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यमिति" सा-मान्यतो वृत्तिमतो विशेषणस्य स्वातन्त्र्येण प्रयोगाभाव-मभिधाय "अगुरुकुलपुत्रादीनां वक्तव्यम्" इत्यनेन गुरु-कुलगुरुपुत्रादीनां विशेषणत्वेऽपि पृथक्प्रयोगाय नञा पर्युदासः कृतः। समानाधिकरणविशेषणस्य तु "समा-नाधिकरणमसमर्थवद्भवतीत्यनेन सर्वथा स्वातन्त्र्येण सामर्थ्याभावात् प्रयोगाभावो भङ्ग्याऽभिहितः। एत-न्मूलकमेव प्राचां गाथा "सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन। सापेक्षं तद्विजानीयादसमस्तवि-शेषणम्। प्रतियोगिपदादन्यत् यदन्यत् कारकादपि। वृत्तिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते" इति। अत्रायं विशेषः भवति प्रधानस्य सापेक्षत्वेऽपि समास इत्युक्तेः प्रधानस्य वृत्त्युपस्थाप्यविशेष्यस्य राजपुरुषादेः सुन्दरादिविशेषणापेक्षायामपि समासः। समासे चाव-यवशक्त्यैव तत्तदर्थपदार्थोपस्थित्या विशेष्यविशेषणभावा-द्यभ्युपगमे सापेक्षत्वादौ समासाभावादिकं वाचनिकं कल्प्यम् तथान्याप्यधिककल्पना स्यादतः समुदायशक्ति-कल्पनम् यथोक्तं हरिणा "बहूनां वृत्तिधर्माणां वचनैरेव साधने। स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः। चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्। कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितमिति"। तथाहि द्व-न्द्वादिविग्रहवाक्ये चकारादि प्रयुज्यते समस्ते तु न तत्र वचनैरेव तन्निषेधः कल्पनीयः समुदायशक्तिपक्षे तु चकारार्थानामप्रयोग इत्युक्तन्यायादेव सिद्धम्। नामार्थयो-रभेदान्वयः कॢप्तः स च राजपदादुपस्थापितराजादेः पुरुषे स्वस्वामिभावसम्बन्धेनान्वये परित्यक्तः स्यात्। सम्बन्धलक्षणायान्तु किमपराद्धम् विशिष्टलक्षणया। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमिति नियमश्च कॢप्तः स च प्राप्तानन्दादौ भज्येत आनन्दकर्त्तृकप्राप्तिकर्मेत्यर्थ-बोधस्योभयसम्मतत्वेन कर्त्तृविहितक्तान्तार्थस्य कर्त्तृविशेष्य-तौचित्येन प्रकृते तद्वैपरीत्यात् आनन्दसम्बन्ध्यादिलक्ष-णास्वीकारे समुदायशक्तिपक्ष एव प्रवेशः। तथा प्राप्त आनन्दो यमिति विग्रहे आनन्दादौ अत्यन्तादिविशेषण-योगवत् समासे तद्वारणाय वृत्तस्य न विशेषणयोग इति वाचनिकत्वकल्पनाऽधिका एतन्मते न्यायसिद्धा इत्यादि बहुविप्लवापत्तिरतः समुदाये शक्तिरित्यन्यत्र विस्तरः। वार्त्तिककृता तु अवश्यं कस्यचित् नञ्समासस्यासमर्थ-समासस्य गमकस्य साधुत्वं वक्तव्यमित्युक्तत्वात् असूर्यम्-पश्येत्यादौ असमर्थेन नञा बाणेन हतमारीचो राम इत्यादौ बाणादेर्विग्रहार्थस्य गमकत्वात् सापेक्षत्वेऽपि तदर्थबोधकतयैव समास इति द्रष्टव्यम्" मतृक्तत्सरला।

"पदसम्बन्धो यो विधिः स समर्थाश्रितो बोध्यः" सि॰कौ॰ "पदस्य पदयोः पदानां वा विधिः पदविधिरिति वचन-विशेषस्याविवक्षितत्वं द्योतयन्नाह पदसम्बन्धीति। तत्र पदेति किम् वर्णाश्रये कार्ये ऽसमर्थेऽपि यथा स्यात् तथा च तिष्ठतु दधि आनयान्नमित्यत्र दध्यानयेति पदयोः सामर्थ्याभावेऽपि वर्णाश्रयं यणादिकं भवत्येव। सूत्रे समर्थपदं लाक्षणिकमिति द्योतयन्नाह समर्थाश्रित इति समर्थेति किं पश्यति कृष्णं श्रितो राममित्यादौ समासो मा भूत् वस्त्रं कृष्णस्य अपत्यं देवदत्तस्येत्यादौ मा भूच्च कृष्णशब्दादपत्यार्थकतद्धितः। इयञ्च परिभाषा समासकृत्-तद्धितादिवृत्तिमात्रे प्रवर्त्तते इति बोध्यम्" मतृक्तत्सरला।

स च समासः षड्विधः।

"सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा। सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः" (सुपां सुपा) पदद्वयमपि सुबन्तम्। राजपुरुष इत्यादिः। (सुपां तिङा)। पूर्वपदं सुबन्तमुत्तरं तिङन्तम्। पर्य्य-भूषयत्। "गतिमतोदात्तवता तिङापि समासः" इति वार्त्तिकात् समासः। (सुपां नाम्ना) कुम्भकार इत्यादि। "उपपदमतिङि"ति समासः। स च "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेरिति" परिभाषया भवति सुबुत्पत्तेः प्राक्। अतोत्तरपदे सुबुत्पत्तेः प्रागि-